309sk22

# 22

# कष्टं न्यासस्य रक्षणम्

संस्कृते सन्ति अनेकानि नाटक–रत्नानि। तेषु 'मृच्छकटिकम्' नाम नाटकं विशेषम् अस्ति। अत्र साधारणस्य जनजीवनस्य भावाः, क्रियाः एवं चित्रिताः यत् ते अद्यापि अस्माकं जीवनस्य, वर्तमानस्य समाजस्य चित्राणि इव प्रतीयन्ते। शूद्रकः अस्य नाटकस्य लेखकः। नाटके चारुदत्तः नाम नायकः। तस्य मित्रं मैत्रेयः नाम विदूषकः। चारुदत्तः पूर्वं धनिकः आसीत् परं भाग्यवशात् दरिद्रः जातः। धूता नाम तस्य पतिपरायणा पत्नी। एकदा वसन्तसेना स्व आभूषणानि चारुदत्ताय न्यासरूपेण रक्षार्थं समर्पितवती। शर्विलकः नाम कोऽपि चौरः चारुदत्तस्य गृहे प्रविष्टवान् तानि आभूषणानि च नीतवान्। एतद् वृत्तं कथं शूद्रकेण निरुपितम् इति अस्मिन् पाठे पठामः।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्

- नाट्यांशस्य सारं कथारूपेण प्रस्तोतुं शक्ष्यति;
- चारुदत्तस्य चरित्रचित्रणं लेखितुं शक्ष्यति;
- प्रसिद्धवाद्ययन्त्राणां नामानि सचित्रं प्रस्तोष्यति;
- लोट्लकारे प्रयुक्तानि वाक्यानि लङ्लकारे परिवर्तयिष्यति;
- स्वस्ति, अलम्, कृते इत्यादीनां योगे उपपदविभक्तिप्रयोगं करिष्यति;
- नी, भज्, याच्, लभ्, सेव् धातुरूपाणां प्रयोगं करिष्यति।

## क्रियाकलापः




उपरिदत्तानि चित्राणि दृष्ट्वा कानि सत्कर्माणि कानि च दुष्कर्माणि इति लिखत

| सत्कर्माणि | दुष्कर्माणि |
| --- | --- |
| ..................... | ..................... |
| ..................... | ..................... |
| ..................... | ..................... |
| ..................... | ..................... |
| ..................... | ..................... |

सत्कर्म कृत्वा नरस्य यशः वर्धते। अत्रापि चारुदत्तः नायकः सर्वं दानं कृत्वा दरिद्रः जातः। सः स्वयशसः विषये कथं चिन्तितः इति पठामः।

## 22.1 मूलपाठः

### कष्टं न्यासस्य रक्षणम्

समयः – अर्धरात्रिः, यदा कदा कीटानाम् उलूकानां ध्वनिः श्रूयते। वीथ्यां पदसंचलनध्वनिः क्रमशः निकटम् आयाति। ततः प्रविशतः चारुदत्तः विदूषकः च।

**चारूदत्तः** – मित्रमैत्रेय! संगीतगोष्ठ्यां बहुकालं व्यतीतम्।

**विदूषकः** – भो एहि एहि। आपणान्तररथ्या विभागेषु सुखं कुक्कुराः अपि सुप्ताः। तद् गृहं गच्छावः।

**चारूदत्तः** – सम्यक् आह भवान्।

**विदूषकः** – भोः इदम् अस्माकं गृहम्। वर्द्धमानक! उद्घाटय द्वारकम्।

(द्वारोद्घाटनध्वनिः)

**वर्द्धमानकः**–आगच्छताम् आर्यौ। अत्र विस्तीर्णे आसने आस्यताम्।

**विदूषकः** – वर्द्धमानक! रदिनिकां शब्दापय पादौ धावितुम्।

**चारुदत्तः** – अलं सुप्तजनं प्रबोधयितुम्। स्वयं प्रक्षालयावः।

**वर्द्धमानकः**–आर्य मैत्रेय! एतत् तव सुवर्णभाण्डम्।

**विदूषकः** – मम सुवर्णभाण्डम्! कुतः मम सुवर्णभाण्डम्?

**वर्द्धमानकः**–कथं विस्मृतं भवता? वसन्तसेनया यत् स्वर्णाभूषणम् आर्यचारुदत्ताय न्यासरूपेण दत्तम् .....

**विदूषकः** – दत्तं भवेत्, तत् किं मया?

**वर्द्धमानकः**–आर्येण कथितम् आसीत् 'इदं स्वर्णभाण्डं रात्रौ मैत्रेयेण दिवा च वर्द्धमानेन रक्षितव्यम् इति। तद् गृहाण एतत्।

**विदूषकः** – हं हो! किम् अद्यापि एतत् तिष्ठति। किम् उज्जयिन्यां चौरः अपि नास्ति यः एतं निद्राचौरं सुवर्णभाण्डम् अपहरति। देहि तर्हि, गृह्णामि।

(रात्रेः तृतीयः प्रहरः उलूंकस्य कीटादीनां च स्वरः श्रूयते। खट्–खट् इति इष्टिका–भ×जन ध्वनिः।)

**शब्दार्थाः**

कीटानाम् = कीड़ों की
वीथ्यां = गली में
एहि = आओ
आपणान्तररथ्याविभागेषु = बाजार के बीच की गलियों में
कुक्कुराः = कुत्ते
सम्यक् = ठीक
उद्घाटय द्वारकम् = दरवाजा खोलो
विस्तीर्णे आसने = बिछाए आसन पर
शब्दापय = बुलाओ
सुप्तजनं = सोए हुए व्यक्ति को
प्रबोधयितुं = जगाना
सुवर्णभाण्डम् = स्वर्णआभूषणों की पेटी
न्यासरूपेण = धरोहर के रूप में
दिवा = दिन में
निद्राचौरः = नींद चुराने वाला
इष्टिकाः = ईंटें
सन्धिः विवरम् = सेंध, चोरी के लिए दीवार पर बनाया गया छेद
अभ्यन्तरम् = आन्तरिकं भागम्, भीतर
कपटशयितम् = झूठ–मूठ का सोना
परमार्थ सुप्तंम् = सचमुच सोए हुए, लक्ष्य सुप्तम
न शंकितः = शंकारहित
सुविशदः = दीर्घः, अतिस्पष्टः

**शर्विलकः** – (मध्यमस्वरेण) भवतु। समाप्तोऽयं सन्धिः। तावत् प्रविशामि अभ्यन्तरम्। अरे! पुरुषद्वयं सुप्तम्। न जाने कपटशमितं परमार्थसुप्तं वा। तावत् परीक्षे।

निःश्वासोऽस्य न शङ्कितः सुविशदः तुल्यान्तरं वर्तते,
दृष्टिर्गाढनिमीलिता न विकला नाभ्यन्तरे चञ्चला।
गात्रं स्रस्तशरीरसन्धिशिथिलं शय्याप्रमाणाधिकम्,
दीपञ्चापि न मर्षयेदभिमुखं स्याल्लक्ष्यसुप्तं यदि।।

तर्हि पश्यामि किं–किं नीतव्यम् अस्ति। अये! कथं मृदङ्गः? अयं पणवः। इयं वीणा, एते वंशाः अमी पुस्तकाः। कथं नाट्याचार्यस्य गृहनिदानम्? हा धिक्, भवनप्रत्ययात् प्रविष्टोऽस्मि। परमार्थ दारिद्रोऽयम्। भवतु गच्छामि।

**विदूषकः** – (स्वप्ने जल्पति) भो वयस्य! सन्धिरिव दृश्यते, चोरमिव पश्यामि। तद् गृह्णातु भवान् इदं सुवर्णभाण्डम्।

**शर्विलकः** – (दृष्ट्वा) अये सत्यमेव एतद् सुवर्णभाण्डम्। भवतु गृह्णामि। अथवा, न युक्तं तुल्यावस्थं पीडयितुम्। तद् गच्छामि।

**विदूषकः** – (निद्रितः एव) भो वयस्य! शापितोऽसि यदि एतत् सुवर्णभाण्डं न गृह्णासि।



22.9

**शर्विलकः** – अनतिक्रमणीया भवतः आज्ञा। तद् गृह्णामि।

**विदूषकः** – भो वयस्व! शीतलः ते अग्रहस्तः।

**शर्विलकः** – (सविस्मयम्) धिक् प्रमादः। (गृह्णाति)

**विदूषकः** – गृहीतम्?

**शर्विलकः** – आम्, गृहीतम्।

**विदूषकः** – इदानीं विक्रीतपण्य इव वणिजः सुखं स्वप्स्यामि।

**शर्विलकः** – स्वपिहि वर्षशतम्। अहमपि गच्छामि।

तुल्यान्तरम्वर्तते = श्वास ग्रहणे निष्कासने च समान व्यवधानं विद्यते
गाढनिमीलिता दृष्टिः = भली भाँति बन्द आंखें
गात्रम् = शरीरम्
स्रस्त–शरीर–संधि–शिथिलम् = निद्राया शिथिलस्य शरीरस्य संधयः अपि शिथिलाः, नींद के कारण पूरा शरीर ढीला ढाला है।
शय्याप्रमाणाधिकम् = सुप्तस्य जनस्य शरीर शय्यायाः प्रमाणात् किञ्चित् दीर्घम् अस्ति, चारपाई से अधिक लंबा शरीर
न मर्षयेत् = न सहेत्
अभिमुखं दीपम् = सम्मुखस्थं दीपकम्, सामने स्थित दीपक
नीतव्यम् = चोरयितव्यम्, ले जाने योग्य है
मृदङ्गः–पणवः = बाजों के नाम
वंशाः = बाँसुरियाँ
भवनप्रत्ययात् = विशालं गृहम् इति मन्यमानः, बड़ा घर समझकर
न युक्तम् = न उचितम्
तुल्यावस्थम् = समान स्थितिकम्, मेरे समान स्थिति वाले
पीडयितुम् = सताना
भट्टिनी = आर्या, सम्माननीया
प्रतीच्छ = गृहाण, ग्रहण कीजिए
कथं चिरयसि = कथं विलम्बं करोषि, देर क्यों कर रहे हो
सदृशदार संग्रहस्य = फलम् सदृशं, अनुरूपं, पत्नी

**रदनिका** – (प्रविश्य सत्रासम्) हा धिक हा धिक्। अस्माकं गेहे सन्धिं कल्पपित्वा चोरो निष्क्रामति। मैत्रेयं प्रबोधयामि। (उच्चैः) आर्य मैत्रेय। उत्तिष्ठ उत्तिष्ठ अस्माकं गेहे सन्धिं कल्पयित्वा चोरः निष्क्रान्तः।

**विदूषकः** – (उत्थाय ससंभ्रमम्) किं भणसि! आः सन्धिः। भो वयस्य चारुदत्त! उत्तिष्ठ उत्तिष्ठ। अस्माकं गेहे सन्धिं दत्त्वा चोर निष्क्रान्तः।

**चारुदत्तः** – (मन्दं हसन्) भवतु। भो! अलं परिहासेन।

**विदूषकः** – न परिहासः स्वयमेव प्रेक्षतां भवान्।

**चारुदत्तः** – इह उज्जयिन्यां कः अस्माकं गृहवैभवं न जानाति। ततः स्वमित्रेभ्यः किं कथयिष्यति–सार्थवाहसुतस्य गृहं प्रविश्य न मया किञ्चिद् आसादितम्।

**विदूषकः** – तेन चिन्तितम् भवेत् महदेतत् गेहम्। इतः सुवर्णभाण्डं निष्क्रामयिष्यामि। (चिन्तयित्वा) सुवर्णभाण्डं....! भो वयस्य! सुष्ठु मया कृतं तत् सुवर्णभाण्डं भवतः हस्ते समर्पयित्वा। अन्यथा दास्याः पुत्रेण अपहृतं भवेत्।

**चारुदत्तः** – अलं परिहासेन।

**विदूषकः** – भोः किम् अहं परिहासस्यापि देशकालं न जानामि?

**चारुदत्तः** – (दीर्घं निःश्वस्य) कदाचिद् एवमपि स्यात्। (सहर्षम्) वयस्य दिष्ट्या प्रियं ते निवेदयामि।

**विदूषकः** – तत् किं न हृतं सुवर्णभाण्डम्।

**चारुदत्तः** – हृतम्।

**विदूषकः** – तथापि किं प्रियम्?

**चारुदत्तः** – यदसौ कृतार्थो गतः।

**विदूषकः** – न्यासः खलु सः वसन्तसेनायाः युष्मद् हस्ते।

**चारुदत्तः** – कथं न्यासः? भोः कष्टम्। अधुनां चरित्रम् अपि दूषितम्।

**विदूषकः** – समाश्वसितु भवान्। अहम् अपलपिष्यामि केन दत्तम्? केन गृहीतम्? को वा साक्षी? इति।

**चारुदत्तः** – अहम् इदानीम् अनृतम् अभिधास्ये?

दारा, तस्या संग्रहस्य प्राप्तेः फलम्, अपने स्वभाव स्वरूप पत्नी पाने का फल

विभवानुगताभार्या–सम्पत्तौ अनुकूलं = कार्यकारिणी पत्नी वैभव में अपने मन के अनुकूल कार्य करने वाली पत्नी,

सुख–दुःख सुहृत् = सुखे च दुःखे च समानः सखा, सुख–दुख में समान रूप से साथ देने वाला मित्र

न परिभ्रष्टम् = न नष्टम्, अभी नष्ट नहीं हुआ

दुर्लभम् = दुष्प्राप्यम्, कठिनाई से मिलता है

आदाय = (आ+दा+ल्यप्) लेकर

सकाशं = समीपम्

आत्मीयम् इति कृत्वा = अपना समझकर

द्यूते = द्यूतक्रीडायाम्, जुआ में

तस्य कृते = तस्य विनिमये, उसके बदले

(ततः प्रविशति चेट्या सह चारुदत्तवधूः धूता)

**धूता** – अयि! सत्यम् अपरिक्षतः शरीरः आर्यपुत्रः?

**चेटी** – सत्यम्, किन्तु यः सः वसन्तसेनायाः न्यासरूपः अलङ्कारकः सोऽपहृतः।

**धूता** – तदा तु सत्यमेव आर्यपुत्रः चारित्रेण परिक्षतः। साम्प्रतम् उज्जयिन्यां सर्वे मन्त्रयिष्यन्ति– 'दरिद्रतया आर्यपुत्रेण एव ईदृशम् अकार्यम् अनुष्ठितम्' इति। (किंचित् विचार्य) आर्य, आर्यमैत्रेयं तावत् शब्दापय।

**चेटी** – आर्य मैत्रेय! भट्टिनी धूता त्वां शब्दापयति।



22.10

**विदूषकः** – (उपसृत्य) स्वस्ति भवत्यै, एष आगतोऽस्मि।

**धूता** – आर्य प्रतीच्छ इमाम्।

**विदूषकः** – किं नु इदम्?

**धूता** – आर्यमैत्रेय! अहं खलु रत्नषष्ठीव्रतम् उपोषिता आसम्। तस्य कृते प्रतीच्छ इमां रत्नमालिकाम्। (निष्क्रामति)

**विदूषकः** – (सहर्षम्) स्वस्ति भवत्यै गमिष्यामि प्रियवयस्यं निवेदयामि।

**चारुदत्तः** – मैत्रेय। कथं चिरयसि?



22.11

**विदूषकः** – एषोऽस्मि, गृहाण एताम्।

**चारुदत्तः** – किमेतद्?

**विदूषकः** – ते सदृशदारसंग्रहस्य फलम् (रत्नावलीं दर्शयति)

**चारुदत्तः** – (सहर्षम्) अहो नाहं दरिद्रः, यतः

विभवानुगता भार्या सुखदुःखसुहृद् भवान्।
सत्यञ्च न परिभ्रष्टं यद् दरिद्रेषु दुर्लभम्।।

मैत्रेय! गच्छ रत्नावलीम् आदाय वसन्तसेनायाः सकाशं वक्तव्या च सा मद्वचनात् यत् भवत्स्वर्णभाण्डम् अस्माभिः आत्मीयम् इति कृत्वा द्यूते हारितम्, तस्य कृते गृह्यतामियं रत्नावली। इति।

## 22.2 बोधप्रश्नाः

1. अयं नाट्यांशः कस्य लेखकस्य कृतिः?

   (क) कालिदासस्य (ख) शूद्रकस्य

   (ग) भासस्य (घ) भवभूतेः

2. कस्मात् नाटकात् गृहीतः अयं नाट्यांशः?
   (क) चारुदत्तात्  (ख) शूद्रकात्
   (ग) मृच्छकटिकात्  (घ) शाकुन्तलात्
3. विदूषकः कः कथ्यते?
   (क) दुष्टः जनः  (ख) विद्वज्जनः
   (ग) नायकस्य विद्वत् मित्रम्  (घ) नायकस्य मूर्ख मित्रम्
4. सुवर्णभाण्डं केन चोरितम्?
   (क) शर्विलकेन  (ख) विदूषकेन
   (ग) चेट्या  (घ) न केनापि
5. सुवर्णभाण्डं कस्य हस्ते कस्याः न्यासम्?
   (क) विदूषकस्य हस्ते वसंतसेनायाः  (ख) विदूषकस्य हस्ते धूतायाः
   (ग) चारुदत्तस्य हस्ते वसंतसेनायाः  (घ) चारुदत्तस्य हस्ते चेट्याः
6. कथं विधा भार्या भुविः दुर्लभा?
   (क) पतिप्रिया  (ख) रूपवती
   (ग) विदुषी  (घ) विभवानुगता

## 22.3 अधुना अवगच्छामः

### प्रथमः अंशः

**रात्रिः तृतीयः प्रहरः ........................................ विदूषकः चोरः निष्क्रान्तः।**

अधुना एतत् नाट्यांशस्य पूर्वार्द्धम् सावधानतया पठामः।

चारुदत्तः तस्य मित्रं विदूषकः च संगीतगोष्ठयाः रात्रौ अतिचिरात् गृहम् आगच्छन्ति। वर्द्धमानकः विदूषकं कथयति–एतत् तव सुवर्णभाण्डम्। एतानि स्वर्ण आभूषणानि वसन्तसेनाया रक्षार्थम् आर्यचारुदत्ताय दत्तानि। एतेषां रक्षाम् अहं दिने करोमि। रात्रौ तु भवान्। अतः गृह्यताम् इदम्।

अस्मिन् अंशे चारुदत्तस्य गृहे सुवर्णभाण्डं कथं चोरितम् जातम् इति अत्र बोधामः।

प्रथमं केषाञ्चन पात्राणाम् परिचयं ज्ञास्यामः।

**शर्विलकः** अत्र चौररूपेण आगतः। सः गृहेषु सन्धिं दत्त्वा चौरकर्मणि निपुणः।

**विदूषकः** चारुदत्तस्य मित्रम्। अस्य वास्तविकं नाम मैत्रेयः अस्ति। विदूषकः संस्कृत नाटकेषु विशेषपात्रं भवति। सः हास्यप्रियः परं विद्वान् भवति।

**रदनिका** चारुदत्तस्य गृहे कापि सेविका, चेटी इति।

**चारुदत्तः** कथायाः नायकः। सः प्रथमं धनिकः आसीत्। भाग्यवशात् तस्य धनं नष्टम् दरिद्रः सन् अपि सः चरित्रवान् अस्ति।

अधुना कथां जानीमः। प्रथमं रङ्गमञ्चे शर्विलकः चोररूपेण आगच्छति। गृहस्य भित्तौ सन्धिं कृत्वा अभ्यन्तरं प्रविशति। तत्र द्वौ जनौ सुप्तौ। कौ तौ? आम् आम्, एकः चारुदत्तः अपरः च मैत्रेयः। चौरस्य नैपुण्यं पश्यन्तु। सः परीक्षितुम् इच्छति यत् तौ सत्यमेव प्रसुप्तौ अथवा कपटेन शयितम् नाटयतः। अत्र प्रगाढसुप्तस्य कानिचिद् लक्षणानि व्यक्तानि; तानि श्लोके पठामः

> निःश्वासोऽस्य न शङ्कितः सुविशदः तुल्यान्तरं वर्तते,
> दृष्टिर्गाढनिमीलिता न विकला नाभ्यन्तरे चञ्चला।
> गात्रं स्त्रस्तशरीरसन्धिशिथिलं शय्याप्रमाणाधिकम्,
> दीपञ्चापि न मर्षयेदभिमुखं स्याल्लक्षसुप्तं यदि।।

**पदच्छेदः–** निश्वासः अस्य न शङ्कितः सुविशदः तुल्यान्तरम् वर्तते,
दृष्टिः गाढनिमीलिता न विकला न अभ्यन्तरे चञ्चला।
गात्रम् स्रस्तशरीरसन्धिशिथिलम् शय्याप्रमाणधिकम्
दीपम् च अपि न मर्षयेत् अभिमुखम् स्यात् लक्षसुप्तम् यदि।।

**अन्वयः–** अस्य (जनस्य) निश्वासः शङ्कितःन। (निःश्वासः) सुविशदः तुल्यान्तरम् वर्तते। (अस्य) दृष्टिः गाढनिमीलिता, न विकला, न चञ्चला। (अस्य) गात्रम् स्रस्तशरीरसन्धि शिथिलम् शय्याप्रमाणात् अधिकम् च (वर्तते)। यदि (अयम् जनः) लक्षसुप्तम् स्यात् तदा अभिमुखम् दीपम् च अपि न मर्षयेत्। श्लोकानुसारं प्रगाढसुप्तं कपटशयितं वा इति उभयोः जनयोः मध्ये विशेषान्तरं स्पष्टम्। तत्कथम् पश्यामः–

| | **प्रगाढसुप्तः जनः** | **कपटशमितः जनः** |
|---|---|---|
| लक्षणानि | | |
| निःश्वासः | – अशङ्कितः | शङ्कितः |
| | – सुविशदः | अल्पः |
| | – निश्वासयोः मध्ये अन्तरं समं भवति | अन्तरं समानं भवति |
| दृष्टिः | – गाढं निमीलिता भवति | गाढं निमीलिता न भवति |
| | – विकला न भवति | विकला/चञ्चला भवति |
| | – गोलकान्तरे चञ्चला न | गोलकान्तरे चञ्चला भवति |
| गात्रम् | – शिथिलांगम् | अशिथिलांगम् |
| | – शिथिलत्वात् शय्याप्रमाणात् अधिकम् दृश्यते | सावधानत्वात् शय्याप्रमाणं भवेद् एव। |
| अभिमुखदीपम् | – प्रगाढसुप्तं जनं दीपप्रकाशः न बाधते | कपटशयितः प्रकाशं न सहते अतः दीपं मर्षयेत् |

चारुदत्त और उसका मित्र विदूषक संगीत गोष्ठी में भाग लेकर रात को देर से घर आते हैं। वर्द्धमानक विदूषक को सुवर्णभाण्ड देता है। यह वही पात्र है जिसमें वसन्तसेना के सोने के गहने भरे हुए हैं और वसन्तसेना ने चारुदत्त को इसकी रक्षा के लिए दिया था। घर आकर फिर सभी सो जाते हैं। शर्विलक ने देखा कि सोए हुए लोग गाढ़ी नींद में हैं क्योंकि उनकी लंबी साँस शंकारहित होकर एक गति से चल रही है, आँख की पुतलियाँ अच्छी तरह बंद हैं, इसलिए दृष्टि में न चञ्चलता है न व्याकुलता, शरीर के अंग जोड़ों से स्वाभाविक रूप से शिथिल हैं और वे इतनी गाढ़ी नींद में हैं कि शरीर खाट से भी बाहर निकल आया है। दीप जल रहा है, पर उसकी भी उन्हें चिन्ता नहीं है।

जानन्ति एव भवन्तः शर्विलकः तत्र किमर्थम् आगतः? चौरकर्म सम्पादनाय। तर्हि सः पश्यति किं किं तत्र चोरणीयम् अस्ति। तत्र स किं पश्यति?

वीणा, पणवः, वंशाः पुस्तकानि। एतानि वस्तूनि कस्यचित् धनिकस्य गृहे न भवेयुः। एतद् गृहं न धनिकस्य परं कस्यचिद् नाट्याचार्यस्य शिक्षकस्य वा भवेत्। सुविशालं गृहं दृष्ट्वा अत्र सः धनार्थम् आगतः आसीत् परं अत्र तु न धनम्। कस्यचित् महादरिद्रस्य गृहम् इदम्। तर्हि गन्तुम् इच्छति।

– तस्मिन् एव समये विदूषकः स्वप्ने कथयति–
  भो वयस्य इति।
  विदूषकस्य किं नाम?
  मैत्रेयः।
– सः स्ववयस्यं = मित्रम् किं कथयति?
  सन्धिः दृश्यते चोरमिव पश्यामि। तद् गृहयतां सुवर्णभाण्डम्।
– किं तत् सुवर्णभाण्डम्?
  तत् आभूषणपात्रम् अस्ति। वसन्तसेनया यानि आभूषणानि चारुदत्तस्य हस्ते अर्पितानि तानि तस्मिन् भाण्डे सन्ति।
– तत् श्रुत्वा शर्विलकः किं करोति?
  स भाण्डे सत्यमेव सुवर्णमयानि आभूषणानि पश्यति।

अत्र नाटकसंघटने एकां विचित्रतां पश्यन्तु। मैत्रेयः सम्बोधयति– "भो वयस्य!" इति। कस्मै एतत् संबोधनम्? चारुदत्तं प्रति, परं शर्विलकः अवगच्छति यत् एष सुप्तः जनः तस्मै (शर्विलकाय) भो वयस्य" इति कथयति तर्हि, मैत्रेयस्य अनुरोधं स्वीकर्तुम् इच्छन् स कथयति– 'भवतु, गृह्णामि।' यदा सः एतत् कर्म न युक्तम् इति मत्वा विरमति तदैव विदूषकः कथयति– "भो वयस्य! शापितोऽसि यदि एतत् सुवर्णभाण्डं न गृह्णासि।"

आज्ञाम् परिपालयन् शर्विलकः सुवर्णभाण्डम् गृह्णति। एवं कुर्वन् तस्य शीतलं हस्तं विदूषकस्य हस्तं स्पृशति।





सुवर्णभाण्डं दत्त्वा विदूषकः कथयति– अधुना विक्रीतपण्य इव वणिजः सुखं स्वप्स्यामि। किमत्र कारणम्?

अर्धनिद्रितावस्थायां विदूषकः स्वप्ने चारुदत्तेन सह जल्पते। परंतु तत्र शर्विलकः एव जागृतः न तु चारुदत्तः। विदूषकः सुवर्णभाण्डं चारुदत्ताय अर्पयितुम् इच्छति। शर्विलकः तं गृह्णाति। एतत् निद्रिताय विदूषकाय नैव स्पष्टं जातम्। मया चारुदत्ताय एव सुवर्णभाण्डम् अर्पितम् इति स मन्यते। अतएव कथयति–

सुवर्णभाण्डम् अर्पयित्वा अधुना अहं निश्शङ्कः जातः।

यदा पण्यसामग्रीं विक्रीय वणिजः सुखेन स्वपिति तदैव चारुदत्ताय सुवर्णभाण्डं अर्पयित्वा अहमपि सुखेन स्वप्स्यामि।

एतस्मिन् अवसरे रदनिका नाम सेविका तत्र आगच्छति। सा सन्धिं दृष्ट्वा उच्चैः वदति सुप्तं जनं च प्रबोधयति। प्रबुद्धः मैत्रेयः अधुना चारुदत्तं प्रबोधयति।

## व्याकरणबिन्दवः

**सन्धिः** भवद्भिः दीर्घसन्धेः नियमाः पूर्वपाठेषु पठिताः। तदनुसारम् एव अत्र अभ्यासः अपेक्षितः।

नाट्याचार्यः = नाट्य + ..................................

प्रमाणाधिकम् = ......................... + अधिकम्

कीटादीनाम् = ......................... + .........................

नाभ्यन्तरे = ......................... + अभ्यन्तरे

परमार्थः = ......................... + .........................

विसर्गाणां पश्चात् यदि अ स्वरः भवति तदा विसर्गस्थाने ओ भवति अ स्थाने च अवग्रहः (ऽ) दीयते। यथा

श्वासः + अस्य = श्वासोऽस्य

प्रविष्टव्यः + अस्मि = प्रविष्टव्योऽस्मि

शापितः + असि = ..................................

................ + ................ = दरिद्रोऽयम्

भवन्तः ध्यानेन पश्यन्तु अत्र पूर्वरूपसन्धिः भवति।

## पाठगतप्रश्ना: 22.1

1. (क) शर्विलकः यदा गृहाभ्यन्तरे प्रविशति तदा तत्र कौ पश्यति?
   (ख) परमार्थसुप्तस्य जनस्य लक्षणद्वयं लिखत।
   (ग) शर्विलकः कस्मात् प्रत्ययात् चारुदत्तस्य गृहे सन्धिं कृत्वा प्रविष्टः आसीत्?
   (घ) 'परमार्थ दरिद्रोऽयम्' इति कथं तेन निर्णीतम्?
   (ङ) मैत्रेयस्य पार्श्वे सुवर्णभाण्डं कुतः?
   (च) मैत्रेयः 'विक्रीतपण्य इव वणिजः सुखं स्वप्स्यामि' इति किमर्थं कथयति?
2. रदनिकायाः त्रासस्य कारणम् किमस्ति
   (क) सन्धिं कल्पयित्वा चौरः निष्क्रामति।
   (ख) सन्धिं दृष्ट्वा विदूषकः उत्तिष्ठति।
   (ग) विदूषकः तां ताडयति।
   (घ) चारुदत्तः तां कुप्यति।
3. शर्विलकः 'धिक् प्रमादम्' इति कथयति।
   तत्र कः प्रमादः?
   (क) सुवर्णभाण्डग्रहणम्
   (ख) सुवर्णभाण्डत्यागम्
   (ग) शीतलेन हस्तेन मैत्रेयस्य स्पर्शः
   (घ) शीतलेन हस्तेन पात्रस्पर्शम्

## द्वितीयः अंशः

**चारुदत्तः (मन्दं हसन्) ................................. रत्नावली इति (समाप्तिपर्यन्तम्)**

इदानीं प्रश्नोत्तर माध्यमेन द्वितीयम् अंशं बोधामः।

– चारुदत्तः विदूषकस्य कथनम् 'परिहासः' इति कथं मन्यते?

  चारुदत्तः परमदरिद्रः। दरिद्रस्य गृहे कोऽपि चौरः सन्धिं कल्पयित्वा गतः इति कथनम् तस्य कृते परिहास इव।

– चौरः कथम् आगतः भवेत्?

  तेन चिन्तितं भवेत् यत् महदेतत् गृहम्। ''इतः सुवर्णभाण्डं निष्क्रामिष्यामि।'' इति निश्चितं कृत्वा चौरः आगतः भवेत्।

– सुवर्णभाण्डं स्मृत्वा विदूषकः कां घटनां स्मरति?

पूर्वं मया सुवर्णभाण्डं चारुदत्ताय समर्पितम्, अन्यथा चौरेण अपहृतम् इति।

– किं परिहासस्यापि देशकालं न जानामि? इति मैत्रेयः किमर्थम् कथयति?

चौरः सन्धिं कृत्वा गतः इति सर्वे विस्मिताः। मैत्रेयेण स्वप्ने सुवर्णभाण्डं चौराय दत्तं परं सः विश्वसिति यत् तेन चारुदत्ताय दत्तं न तु चौराय। चारुदत्तः मैत्रेयवचनम् परिहासम् इति मन्यते। तदा मैत्रेयः कथयति इदं स्थानं समयं वा परिहासाय न युक्तम् इति अहम् जानामि।

– हृतेऽपि सुवर्णभाण्डे चारुदत्तः कथं हृष्टः?

चौरः दरिद्रचारुदत्तस्य गृहे प्रविश्य सुवर्णघटहस्तः गतः न तु रिक्तहस्तः इति मत्वा चारुदत्तः प्रसन्नः आसीत्।

– 'अधुना चारित्रम् अपि दुष्टम्' अस्य कः अभिप्रायः?

दरिद्रः अपि चारुदत्तः सच्चरित्रवान् जनः। चौरेण यत् हृतं तत् वसन्तसेनायाः न्यासः आसीत्। अधुना जनाः तमेव चौरं मत्वा कथयिष्यन्ति यत् अनेनैव ईदृशम् अकार्यम् अनुष्ठितम्।

– धूता मैत्रेयं किमर्थम् आह्वयति?

सा बहुमूल्यां स्वरत्नावलीं दत्त्वा वसन्तसेनायाः न्यासस्य प्रत्यावर्तनम् कामयते।

– 'सदृशदारसंग्रहं' किम्? किं तस्य फलम्?

पत्नी स्वपत्युः विपत्तिसमये तस्य साहाय्यं करोति। तस्य सुख–दुःखेः स्व सुख–दुःखे इति मन्यते। एवंविधा दारा (पत्नी) प्राप्तिः एव 'सदृशदारसंग्रहः' इति। तस्य फलम् कष्टेभ्यः सङ्कटेभ्यः पत्युः मुक्तिः।

– अधुना चारुदत्तस्य श्लोकं वारमेकं पठन्तु

विभवानुगता भार्या सुखदुःखसुहृद् भवान्।
सत्यञ्च न परिभ्रष्टं यद् दरिद्रेषु दुर्लभम्।।

**अन्वयः**– यस्य (मम) भार्या विभवानुगता, भवान्, सुख–दुःखसुहृद्, सत्यम् च, न परिभ्रष्टम्, (यत्) दरिद्रेषु दुर्लभम्।

**भावार्थः**– चारुदत्तः आत्मानं सौभाग्यशाली मन्यते। तत्कथं? तस्य भार्या सम्पत्तौ विपत्तौ च तस्यानुकूलम् एव आचरति। तस्य मित्रं मैत्रेयः अपि न केवलं सुखसौभाग्य काले मैत्रीं निर्वहति दुःखकालेऽपि स मित्रकर्तव्यानि निर्वहति। दरिद्रजनेषु प्रायः सत्यवचनं न दृश्यते परं दरिद्रः अपि चारुदत्तः सत्यं रक्षति– अतः स न दरिद्रः स तु सौभाग्यशाली एव।

अधुना कानिचित् प्रश्नानि तेषाम् उत्तराणि च बोधयत

(क) रत्नावलीम् आदाय चारुदत्तः मैत्रेयं कुत्र प्रेषयति?

वसन्तसेनायाः सकाशं







(ख) 'वक्तव्या च सा मद्वचनात्' अत्र सा पदं कस्यै प्रयुक्तम्?

वसन्तसेनायै।

(ग) वसन्तसेना चारुदत्तवचनात् किं वक्तव्या?

युष्माकं सुवर्णभाण्डं अस्माभिः आत्मीयं कृत्वा द्यूतक्रीडायां हारितम्। तस्य कृते इयं रत्नावली प्रेष्यते, तद् गृह्यताम्।

**सारः**

रात्रौ शर्विलकः नाम चौरः चारुदत्तस्य गृहे सन्धिं कल्पयित्वा प्रविशति। तत्र स बहुमूल्यानि वस्तूनि द्रव्यं वा अन्वेषयति किन्तु केवलं मृदङ्गवीणादीनि वाद्ययन्त्राणि पुस्तकानि च पश्यति। एतद् दृष्ट्वा सः असन्तुष्टः भवति। सः तु अत्र बहुमूल्यं किञ्चित् नेतव्यम् भवेत् इति चिन्तयित्वा आगतः किन्तु इदं गृहं तु कस्यापि अतिदरिद्रस्य दृश्यते। स प्रत्यावर्तुम् इच्छति। तदैव विदूषकः स्वप्ने कथयति– गृहाण एतत् सुवर्णभाण्डम्। प्रथमं स सुप्तजनान् सुवर्णभाण्डं गृहीतुम् अयुक्तं मन्यते किन्तु यदा विदूषकः 'शापितोऽसि यदि न गृह्णाति' इति कथयति तदा शर्विलकः शापभयेन सुवर्णभाण्डं गृह्णाति। विदूषकः अवगच्छति यत् तेन स्वर्णाभूषणस्य पेटिका चारुदत्ताय समर्पिता। एवं मत्वा सः निश्चिन्तः स्वपिति।

रात में शर्विलक नाम का चोर चारुदत्त के घर में सेंध लगाकर प्रवेश करता है। वहाँ वह बहुमूल्य वस्तुएँ खोजता है किन्तु केवल मृदंग, वीणा पुस्तकें देख कर असन्तुष्ट हो जाता है। वह तो कीमती सामान लेने के लिए आया था किन्तु यह तो किसी अत्यन्त गरीब का घर निकला। अतः वह लौटना चाहता है। वैसे ही विदूषक स्वप्न में कहता है कि यह सुवर्णभाण्ड ले लो। पहले तो वह किसी सोए हुए व्यक्ति से सुवर्णभाण्ड लेना अनुचित समझता है किन्तु विदूषक स्वर्णभाण्ड की पेटी स्वीकार न करने पर उसे शाप देने की बात कहता है। शाप के डर से शर्विलक उसे ले लेता है। विदूषक समझता है कि उसने स्वर्णाभूषण की पेटी चारुदत्त को सौंप दी है। ऐसा मानकर वह निश्चिन्त होकर सुखपूर्वक सो जाता है।

## व्याकरणबिन्दवः

| (क) लोट्लकारः (आज्ञा–अर्थे) | लङ्लकारः (भूतकाले) | क्तप्रत्यान्तम् |
|---|---|---|
| (i) गृह्णातु | अगृह्णात् | गृहीतम् |
| (ii) स्वपिहि | अस्वपः | सुप्तम् |
| (iii) उत्तिष्ठ | उदतिष्ठः | स्थितम् |
| (iv) प्रेक्ष्यताम् | अप्रेक्ष्यताम् | प्रेक्षितम् |
| (vi) प्रतीक्ष | अप्रतीक्षः | प्रतीक्षितम् |
| (vii) गृहाण | अगृहणाः | गृहीतम् |
| (viii) गृह्यताम् | अगृह्यताम् | गृहीतम् |





**(ख) उपपदविभक्तयः**

(I) अलम् (मा कुरु) इत्यर्थे तृतीया।

(i) अलं परिहासेन।

(ii) अलं विवादेन।

(iii) अलं कपटेन।

(iv) अलम् अनृतेन।

(v) अलम् ......................................... (मूर्खता)

(vi) अलम् ......................................... (असत्य)

(vii) अलम् ......................................... (विग्रह)

(II) अलम् (पर्याप्तम्) इत्यर्थे चतुर्थी

(i) रामः रावणाय अलम्।

(ii) सैनिकः रिपवे अलम्।

(iii) अयम् पाठः छात्रेभ्यः अलम्।

(iv) विद्वान् मूर्खाय अलम्।

(v) इदं धनं ............... ............... अलम् (याचक)।

(vi) इमानि पुष्पाणि ............... ............... अलम् (पुष्पमाला)।

(vii) एषः मल्लः ............... ............... अलम् (तद्)।

(III) स्वस्ति (कल्याणं भवतु) योगे–चतुर्थी भवति।

स्वस्ति भवत्यै    स्वस्ति शिष्याय

स्वस्ति राज्ञे    जनेभ्यः स्वस्ति

स्वस्ति प्रजाभ्यः

**(ग) सूक्तीः**

(i) न युक्तम् तुल्यावस्थं पीडयितुम्।

(i) इदानीं विक्रीतपण्य इव ...............................................

(iii) नाहं दरिद्रः, यतः

(iv) ..................................................................

## धातुरूपाणि

### नी (नय्) (परस्मैपदे) (भ्वादिगणतः)

| | लट्लकारः | | | लृट्लकारः | | |
|---|---|---|---|---|---|---|
| | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्र० पु० | नयति | नयतः | नयन्ति | नेष्यति | नेष्यतः | नेष्यन्ति |
| म० पु० | नयसि | नयथः | नयथ | नेष्यसि | नेष्यथः | नेष्यथ |
| उ० पु० | नयामि | नयावः | नयामः | नेष्यामि | नेष्यावः | नेष्यामः |



टिप्पणी

| | लङ्लकारः | | | लोट्लकारः | | |
|---|---|---|---|---|---|---|
| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्र० पु०** | अनयत् | अनयताम् | अनयन् | नयतु | नयताम् | नयन्तु |
| **म० पु०** | अनयः | अनयतम् | अनयत | नय | नयतम् | नयत |
| **उ० पु०** | अनयम् | अनयाव | अनयाम | नयानि | नयाव | नयाम |

**विधिलिङ्**

| | | | |
|---|---|---|---|
| **प्र० पु०** | नयेत् | नयेताम् | नयेयुः |
| **म० पु०** | नयेः | नयेतम् | नयेत |
| **उ० पु०** | नयेयम् | नयेव | नयेम |

## नी (नय्) (आत्मनेपदे)

| | लट्लकारः | | | लृट्लकारः | | |
|---|---|---|---|---|---|---|
| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्र० पु०** | नयते | नयेते | नयन्ते | नेष्यते | नेष्येते | नेष्यन्ते |
| **म० पु०** | नयसे | नयेथे | नयध्वे | नेष्यसे | नेष्येथे | नेष्यध्वे |
| **उ० पु०** | नये | नयावहे | नयामहे | नेष्ये | नेष्यावहे | नेष्यामहे |

| | लङ्लकारः | | | लोट्लकारः | | |
|---|---|---|---|---|---|---|
| **प्र० पु०** | अनयत | अनयेताम् | अनयन्त | नयताम् | नयेताम् | नयन्ताम् |
| **म० पु०** | अनयथाः | अनयेथाम् | अनयध्वम् | नयस्व | नयेथाम् | नयध्वम् |
| **उ० पु०** | अनये | अनयावहि | अनयामहि | नयै | नयावहै | नयामहै |

**विधिलिङ्**

| | | | |
|---|---|---|---|
| **प्र० पु०** | नयेत | नयेताम् | नयेरन् |
| **म० पु०** | नयेथाः | नयेथाम् | नयेध्वम् |
| **उ० पु०** | नयेय | नयेवहि | नयेमहि |

एवमेव भज् धातोः अपि रूपाणि भवति।

परस्मैपदे–

लट्लकारः– भजति ..............................; लृटलकारः– भक्ष्यति ..........................

लङ्लकारः– अभजत् ..........................; लोट्लकारः– भजतु ............................

विधिलिङ्– भजेत् ............................ ।

आत्मनेपदे–

लट्लकारः– भजते ............................; लृटलकारः– भक्ष्यते ..........................

लङ्लकारः– अभजत् ..........................; लोट्लकारः– भजताम् ............................

विधिलिङ्– भजेत ............................ ।

## लभ् (भ्वादिगणतः) आत्मनेपदी

| | लट्लकारः | | | लृट्लकारः | | |
|---|---|---|---|---|---|---|
| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्र० पु०** | लभते | लभेते | लभन्ते | लप्स्यते | लप्स्येते | लप्स्यन्ते |
| **म० पु०** | लभसे | लभेथे | लभध्वे | लप्स्यसे | लप्स्येथे | लप्स्यध्वे |
| **उ० पु०** | लभे | लभावहे | लभामहे | लप्स्ये | लप्स्यावहे | लप्स्यामहे |

| | लङ्लकारः | | | लोट्लकारः | | |
|---|---|---|---|---|---|---|
| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्र० पु०** | अलभत | अलभेताम् | अलभन्त | लभताम् | लभेताम् | लभन्ताम् |
| **म० पु०** | अलभथाः | अलभेथाम् | अलभध्वम् | लभस्व | लभेथाम् | लभध्वम् |
| **उ० पु०** | अलभे | अलभावहि | अलभामहि | लभै | लभावहै | लभामहै |

**विधिलिङ्**

| | | | |
|---|---|---|---|
| **प्र० पु०** | लभेत | लभेयाताम् | लभेरन् |
| **म० पु०** | लभेथाः | लभेयाथाम् | लभेध्वम् |
| **उ० पु०** | लभेय | लभेवहि | लभेमहि |

एवमेव सेव्धातोः रूपाणि भवन्ति।

सेव् (भ्वादिगणतः) आत्मनेपदी–

लट्लकारः– सेवते ..............................; लृट्लकारः– सेविष्यते ..........................

लङ्लकारः– असेवत ..........................; लोट्लकारः– सेवताम् ............................

विधिलिङ्– सेवताम् .............................. ।

## याच् (भ्वादिगणतः) उभयपदी परस्मैपदे

| | लट्लकारः | | | लृट्लकारः | | |
|---|---|---|---|---|---|---|
| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **प्र० पु०** | याचति | याचतः | याचन्ति | याचिष्यति | याचिष्यतः | याचिष्यन्ति |
| **म० पु०** | याचसि | याचथः | याचथ | याचिष्यसि | याचिष्यथः | याचिष्यथ |
| **उ० पु०** | याचामि | याचावः | याचामः | याचिष्यामि | याचिष्यावः | याचिष्यामः |
| | **लङ्लकारः** | | | **लोट्लकारः** | | |
| **प्र० पु०** | अयाचत् | अयाचताम् | अयाचन् | याचतु | याचताम् | याचन्तु |
| **म० पु०** | अयाचः | अयाचतम् | अयाचत | याच | याचतम् | याचत |
| **उ० पु०** | अयाचम् | अयाचाव | अयाचाम | याचानि | याचाव | याचाम |

**विधिलिङ्**

| | | | |
|---|---|---|---|
| **प्र० पु०** | याचेत् | याचेताम् | याचेयुः |
| **म० पु०** | याचेः | याचेतम् | याचेत |
| **उ० पु०** | याचेयम् | याचेव | याचेम |

आत्मनेपदे

लट्लकारः– याचते ..............................; लृटलकारः– याचिष्यते ..........................

लङ्लकारः– अयाचत ..........................; लोट्लकारः– याचताम् ............................

विधिलिङ्– याचेत .............................. ।

'भज्' धातुः अपि उभयपदी। भज् धातोः रूपाणि अपि 'याच्' धातोः रूपाणि इव भवन्ति। केवलं लृट्लकारे भिन्नता वर्तते

परस्मैपदे–

लट्लकारः– भजति ..............................; लृटलकारः– भजिष्यति..........................

लङ्लकारः– अभजत् ..........................; लोट्लकारः– भजतु ............................

विधिलिङ्– भजेत् .............................. ।



आत्मनेपदे–

लट्लकारः– भजते ..............................; लृटलकारः– भक्ष्यते ..........................

लङ्लकारः– अभजत ..........................; लोट्लकारः– भजताम् ............................

विधिलिङ्– भजेत .............................।

## पाठगतप्रश्नाः 22.2

1. (क) चारुदत्तस्य गृहे चौरः किं चिन्तयित्वा आगतः?

   (ख) तस्य चौरकर्मणा चारुदत्तः कथं 'कृतार्थः' अभवत्?

   (ग) उज्जयिन्यां कः अस्माकं गृहवैभवं न जानाति?

   (घ) धूता चारुदत्तं चरित्रेण परिक्षतं कथं मन्यते?

   (ङ) धूतया स चारित्रपरिक्षतेन कथं रक्षितः?

2. चारुदत्तस्य मतेन दरिद्रेषु किं दुर्लभम् भवति?

   (क) धनम्  (ख) सत्यम्  (ग) बुद्धिः  (घ) धैर्यम्

3. चारुदत्तः नाहं दरिद्रः इति किमर्थं कथयति?

   (क) तस्य विभवानुगता भार्या पत्नी

   (ख) तस्य सुख दुःख सुहृत् अस्ति

   (ग) तस्य सत्यं न परिभ्रष्टम्

   (घ) तस्य उपर्युक्तं सर्वं विद्यते

## 22.4 किम् अधिगतम्

- चारुदत्तः सत्यप्रियः सच्चरित्रः धनलोभात् विरक्तः अस्ति।
- विदूषकः चारुदत्तस्य हास्यप्रियः सखा अस्ति। तस्य नाम मैत्रेयः अस्ति।
- चारुदत्तस्य पत्नी आर्यधूता अस्ति। सा पतिव्रता सम्माननीया गृहिणी अस्ति।
- आर्यधूता पत्युः यशः रक्षार्थं स्वप्रियम् आभूषणं वसन्तसेनायै प्रयच्छति।
- नाट्यांशस्य सारम् अतीव मनोरञ्जकम् अस्ति।
- लोट्लकारक्रियापदानां लङ्लकारे परिवर्तनं कर्तुं शक्यते।
- स्वस्ति, अलम् (पर्याप्त्यर्थे) पदयोः योगे चतुर्थी, अलम् (निषेधार्थे) तृतीया भवति। 'कृते' योगे तु षष्ठी।
- पणवः, मृदङ्गः, वीणा वाद्ययन्त्राणि सन्ति।

## 22.5 योग्यताविस्तारः

**(क) मृच्छकटिकम्**– संस्कृतसाहित्यनाट्यजगति मृच्छकटिकम् नाटकम् अन्यतमं वर्तते। इदं नाटकम् एकं प्रकरणं वर्तते। प्रकरणस्य वृत्तम् लौकिकम् कविकल्पितं च भवति। अस्य नायकः चारुदत्तः धीरप्रशान्तलक्षणयुक्तः मध्यमकुलस्य सामान्यः जनः वर्तते। उदारतया दानशीलतया च सः निर्धनः जायते। नाटके चौरसेवकशाकटिकचाण्डालादीनि सामान्यपात्राणि सन्ति। नायिका वसन्तसेना अपि एका गणिका अस्ति। नाटककारः अस्मिन् नाटके सामान्यजीवनस्य यथार्थचित्रणं कृतवान्।

**(ख) शूद्रकः** मृच्छकटिकनाटकस्य रचयिता शूद्रकः एकः राजा आसीत्। सः धर्मशास्त्रे, द्यूतकलायां, चौर्यकलायां, लोकविद्यायां च निष्णातः आसीत्। शूद्रकस्य स्थितिकालः तृतीयशताब्दी मन्यते। अयं नाटककारः भारतस्य दक्षिणतः प्रतीयते।

**(ग) भावविस्तारः**

दृश्यम् लोकोक्तयः सूक्तयः

(क) आपणान्तररथ्या विभागेषु सुखं कुक्कुराः अपि सुप्ताः। अर्धरात्रेः परम् एतत् दृश्यम् कुक्कुराः अपि सुखेन सुप्ताः। निःशब्दा रात्रिः।

(ख) अलं सुप्तजनं प्रबोधयितुम्।

(ग) न जाने कपटशयितं परमार्थसुप्तम् वा।

(घ) इदानीं विक्रीतपण्य इव वणिजः सुखं स्वप्स्यामि। (निश्चिन्तः)

(ङ) किम् अहं परिहासस्यापि देशकालं न जानामि।

(च) सत्यञ्च न परिभ्रष्टं यद्दरिद्रेषु दुर्लभम्।

(छ) पतिव्रताः नार्यः दुर्लभाः लोके।

(ज) भर्तुर्भोग्यं तु नार्येका प्राप्नोति पुरुषर्षभ।

(झ) दातव्यमन्नं विधिवत् सत्कृत्य न तु लीलया। (बालकाण्डम् 93/94)

(ञ) कालो हि दुरतिक्रमः। (अरण्यकाण्डम् 68/29)

**भाषाविस्तारः**

**(क) उपपदविभक्तयः**

**कारकविभक्तिः** – कारकम् आश्रित्य या विभक्तिः भवति, सा कारकविभक्तिः कथ्यते।

यथा– (i) त्वम् कलमेन लिखसि।

(ii) वनात् कः आगतः?

अत्र क्रमशः करणकारकम् अपादानकारकं चास्ति। अतः तत्र तृतीया पञ्चमी विभक्ती भवतः। यतः करणकारके तृतीया भवति, अपादानकारके (पृथगर्थे) पञ्चमी भवति।

**उपपदविभक्तिः** – यदा किमपि पदम् आश्रित्य कारकविभक्तिः न भवति, अन्या विभक्तिः भवति, तदा उपपदविभक्तिप्रयोगः कथ्यते।

यथा– द्वितीया उपपदविभक्तिः (i) विद्यां विना ज्ञानं न भवति।

तृतीया उपपदविभक्तिः (ii) पुत्रेण सह आगतः पिता।

(iii) तव बलेन सदृशः कः अस्ति?

अत्र 'विना' 'सह', 'सदृशः' एते उपपदानि सन्ति। अतः तत्र क्रमशः द्वितीया तृतीयाविभक्ति दृश्यते।

चतुर्थी उपपदविभक्तिः (i) गुरवे नमः। अत्र 'नमः' योगे चतुर्थी।

(ii) पुत्राय क्रुध्यति। अत्र 'क्रुध्' धातुयोगे चतुर्थी।

पंचमी उपपदविभक्तिः (i) विद्यालयात् बहिः वृक्षाः सन्ति।

(ii) अशोकः श्यामात् पटुः।

अत्र 'बहिः' पदयोगे पञ्चमी। तुलना एकस्य उत्कर्षज्ञापने च पञ्चमी भवति।

षष्ठी उपपदविभक्तिः (i) कृत् प्रत्यययोगे (ल्युट्) षष्ठी भवति।

कष्टं न्यासस्य रक्षणम्।

(ii) निर्धारण अर्थे षष्ठी वा सप्तमी भवति।

यथा (i) पुष्पाणाम्/पुष्पेषु कमलं श्रेष्ठम् (षष्ठी/सप्तमी)

(ii) सर्वछात्रेषु कुशलः (सप्तमी)

(ii) निपुणः, पदयोगेऽपि सप्तमी भवति।

युद्धे निपुणः।

अत्र विशिष्टम् अवधेयम् अस्ति–

यत्र कारक विभक्तिः प्राप्ता भवति, उपपदविभक्तिः अपि प्राप्ता भवति, तदा उपपदविभक्तिः एव भविष्यति।

लोट्लकारस्य वाक्यानां लङ्लकारे परिवर्तनम्। लोट्लकारः आज्ञायां भवति। लङ् च भूतकाले। भाषादृष्ट्या अस्य परिवर्तनम् महत्त्वपूर्णम्।

**यथाः** पिता छात्रम् आदिशति – त्वम् विद्यालयं गच्छ। (लोट्लकारः)

तदा छात्रः पितरं वदति – अहं विद्यालयम् अगच्छम्। अर्थात् आदेशात् पूर्वमेव आज्ञापालनं कृतवान्।

## 22.6 पाठान्तप्रश्नाः

1. (क) चारुदत्तः मित्रेण सह गृहं विलम्बेन कथम् आगतवान्?

(ख) विदूषकः सुवर्णभाण्डं स्वप्ने कस्मै दत्तवान्?

(ग) शर्विलकः किं किं वाद्ययन्त्रम् चारुदत्तस्य गृहे दृष्टवान्?





(घ) उज्जयिन्यां सर्वे चारुदत्तस्यविषये किं जानन्ति?

(ङ) चारुदत्तस्य हस्ते कस्याः न्यासः आसीत्?

(च) आर्याधूता वसन्तसेनायाः न्यासरूपे प्रदत्ताः अलंकाराः अपहृताः इति श्रुत्वा किं कथयति?

2. अधोलिखितगुणाः कस्य कस्य चरित्रेण सम्बद्धाः? लिखत।

सत्यवादिता, मैत्रीभावः, त्यागशीलता, धैर्यम्, सेवकान् प्रति कारुण्यम्, सुखदुःखयोः समत्वम्, सहिष्णुता।

| | | |
|---|---|---|
| (क) चारुदत्तः | (i) ........................................ | (ii) ........................................ |
| (ख) विदूषकः | (iii) ........................................ | (iv) ........................................ |
| (ग) शर्विलकः | (v) ........................................ | (vi) ........................................ |
| (घ) धूता | (vii) ........................................ | (viii) ........................................ |

3. चारुदत्तस्य चरित्रचित्रणं स्वेच्छया पञ्च/षट् वाक्येषु लिखत।

4. 'आर्यधूता' कीदृशी गृहिणी अस्ति? चतुर्वाक्येषु लिखत।

5. कोष्ठकान्तर्शब्देषु उपपदविभक्तिं प्रयुज्य रिक्तस्थानपूर्तिं कुरुत–

(क) स्वस्ति .................................... एष आगतोऽस्मि। (भवत्)

(ख) भोः अलं ........................................। (परिहास)

(ग) ततः सः स्व ................................ किं कथयिष्यति। (मित्र)

(घ) .......................... कृते प्रतीच्छ इमां रत्नमालिकाम्। (तत्)

(ङ) वयस्य! दिष्ट्या प्रियं ............................ निवेदयामि। (युष्मद्)

6. निर्दिष्टधातुभिः क्त प्रत्यययोगेन वाक्यपूर्तिं कुरुत

(क) आपणेषु कुक्कुराः सुखं ......................। (स्वप् + क्त)

(ख) ............ आसने आस्यताम्। (वि + स्तृ + क्त)

(ग) कथं ......................... भवता? (वि + स्मृ + क्त)

(घ) वसन्तसेनया स्वर्णाभूषणानि चारुदत्ताय न्यासरूपेण ...................। (दा + क्त)

7. निर्देशानुसारम् उपयुक्तैः धातुरूपैः रिक्तस्थानानि पूरयत

(i) पिता पुत्रीं पाठशालां ................................। (नी– लट्लकारः)

(ii) ऋषयः जनान् सन्मार्गम् ......................। (नी– लङ्लकारः)

(iii) छात्रः परिश्रमेण विद्यां ....................। (लभ्–विधिलिङ्)

(iv) सुयोग्याः विद्यार्थिनः पुरस्कारान् ....................। (लभ्–लृट्लकारः)

(v) त्वं स्वराष्ट्रं मातृवत् ............................। (सेव्–लोट्लकारः)

(vi) वयं स्वपितरौ अहर्निशं ............................। (सेव्–लट्लकारः)

(vii) याचकाः धनिकान् धनम् ............................ । (याच्–लङ्लकारः)

(viii) त्वं कमपि किमपि न ...................... । (याच्–लोट्लकारः)

(ix) अभितप्तम् अयः अपि मार्दवं ........................ । (भज्–लट्लकारः)

(x) भक्ताः परमेश्वरं .............................. । (भज्–विधिलिङ्)

## 22.7 उत्तराणि

**22.3 बोधप्रश्नाः**

1. (ख)
2. (ग)
3. (ग)
4. (क)
5. (ग)
6. (घ)

**पाठगतप्रश्नाः**

**22.1** 1. (क) विदूषकं चारुदत्तं च

(ख) निःश्वासः, दृष्टिर्गाढ़निमीलिता

(ग) भवनप्रत्ययात्

(घ) यतः चारुदत्तस्य गृहे वाद्ययन्त्राणि पुस्तकानि एव तेन दृष्टानि न किमपि मूल्यवान् वस्तु।

(ङ) मैत्रेयस्य पार्श्वे सुवर्णभाण्डं वर्धमानकेन दत्तम्।

2. क 3. ग

**22.2** 1. (क) चौर्यं कर्तुम्

(ख) पत्न्याः अनुकूलतां दृष्ट्वा कृतार्थः भवति।

(ग) सुहृद्जनः

(घ) न्यासस्य रक्षणाभावेन

(ङ) सा रत्नावली स्व अमूल्यम् आभूषणं पत्युः यशो रक्षार्थं दत्तवती।

2. (ख)

3. (घ)



### 22.6 पाठान्तप्रश्नाः

1. (क) चारुदत्तः सङ्गीतगोष्ठ्यां भागं गृहीत्वा विलम्बेन आगतवान्।

   (ख) शर्विलकाय

   (ग) पणवः मदृङ्गम् वीणा

   (घ) चारुदत्तस्य गृहवैभवम्

   (ङ) वसन्तसेनायाः

   (च) आर्यधूता कथयति आर्यपुत्रः चारित्रेण परिक्षतः।

2. (क) चारुदत्तः सत्यवादिता, सुखदुःखयोः समत्वम् सेवकान् प्रति कारूण्यम्।

   (ख) विदूषकः मैत्रीभावः

   (ग) शर्विलक, चौर्यम्

   (घ) धूता – त्यागशीलता, सहिष्णुता

3. स्वेच्छया पञ्च/षट्वाक्यानि लेखनीयानि।

4. स्वेच्छया चरित्रचित्रणं चतुर्वाक्येषु कुरुत।

5. (क) भवत्यै

   (ख) परिहासेन

   (ग) मित्राय

   (घ) तस्य

   (ङ) तुभ्यम्

6. (क) सुप्ताः (ख) विस्तीर्णे (ग) विस्मृतम् (घ) दत्तनि

7. (i) नयति अथवा नयते

   (ii) अनयन् अथवा अनयन्त

   (iii) लभेत

   (iv) लप्स्यन्ते

   (v) सेवस्व

   (vi) सेवामहे

   (vii) अयाचन् अथवा अयाचन्त

   (viii) याच अथवा याचस्व

   (ix) भजति अथवा भजते

   (x) भजेयुः अथवा भजेरन्